इति हेमचन्द्रः ॥ (यथा, रामायणे ।२।४५।११।
"यथा यथा दाशरथिर्धर्म्ममेवाश्रितोऽभवत् ।
तथा तथा प्रकृतयो रामं पतिमकामयन् ॥")

दाशार्हः, पुं, (दाश दाने + भावे घञ् । दाशं दान-मर्हतीति । अर्ह + अच् ।) विष्णुः । इति हेम-चन्द्रः ॥ (यथा, महाभारते ।१३।१४९।६७।
"विजयो जयः सत्यसन्धो दाशार्हः सात्वतां
पतिः ॥")

दशार्हदेशजश्च ॥

दाशेरकः, पुं, मालवदेशः । इति त्रिकाण्डशेषः ॥

दाश्वः, त्रि, (दाशति ददातीति । दाश + बाहुल-कात् वन् ।) दाता । इति जटाधरः ॥

दाश्वान्, [स्] त्रि, (दाश्ट दाने + "दाश्वान् सा-ह्वान् मीढ्वांश्च ।" ६।१।१२। इति क्वसुप्रत्ययेन निपातनात् साधुः ।) दत्तवान् । इति मुग्धबो-धम् ॥ (यथा, रघुः । १४ । ७१ ।
"तस्मै मुनिर्दोहदलिङ्गदर्शी
दाश्वान् सुपुत्राशिषमित्युवाच ॥")

दासृ, ऋ ञ दाने । इति कविकल्पद्रुमः ॥ (भ्वा-उभं-सकं-सेट् ।) ऋ, अददासत् । ञ, दासति दासते । इति दुर्गादासः ॥

दास, र न वधे । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् ।) र वैदिकः । न, दास्नोति । इति दुर्गादासः ॥

दासः, पुं, (दसतीति । दसि + "दंसेष्टटनौ न आत् ।" उणां ५ । १० । इति टः नकारस्य चाकारः ।) शूद्रः । (यथा, ऋग्वेदे ।२।१२।४।
"यो दासं वर्णमधरं गुहाकः ॥"
अधुना कायस्थानां उपाधिभेदः । स तु अष्टसिद्ध-मौलिकानामन्यतमः । यथा, कुलदीपिकायाम् ।
"गौड़ेऽस्मै कीर्त्तिमन्तश्चिरवसतिकृता मौलिका
ये हि सिद्धा-
स्ते दत्ता सेनदासाः करगुहसहिताः पालिताः
सिंहदेवाः ॥")
ज्ञातात्मा । धीवरः । इति मेदिनी । से, ४ ॥
दानपात्रम् । इति विश्वः ॥ शूद्राणां नामान्त-प्रयोज्यपद्धतिविशेषः । यथा,—
"शर्म्मान्तं ब्राह्मणस्य स्यात् वर्म्मान्तं क्षत्रियस्य च।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः ॥"
इत्युद्वाहतत्त्वम् ॥ * ॥
दास्यते दीयते भृतिम्मूल्यादिकं यस्मै सः । चा-कर इति भाषा । तत्पर्य्यायः । भृत्यः २ दासेरः ३ दासेयः ४ गोप्यकः ५ चेटकः ६ नियोज्यः ७ किङ्करः ८ प्रेष्यः ९ भुजिष्यः १० परिचारकः ११ । इत्यमरः । २ । १० । १७ ॥ प्रेष्यः १२ प्रेषः १३ प्रैषः १४ । इति भरतः ॥ परिकर्म्मी १५ परिचरः १६ सहायः १७ उपस्थाता १८ सेवकः १९ अभिसरः २० अनुगः २१ । स पञ्चदशविधः । यथा नारदः ।
"गृहजातस्तथा क्रीतो लब्धो दायादुपागतः ।
अन्नाकालभृतस्तद्वदाहितः स्वामिना च यः ॥
मोक्षितो महतश्चर्णात् युद्धे प्राप्तः पणे जितः ।
तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥
भक्तदासश्च विज्ञेयस्तथैव वड़वाहृतः ।
विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः ॥"
अस्यार्थः । गृहजातो दास्यामुत्पन्नः । दाया-दुपागतः क्रमागतः । अन्नाकालभृतः दुर्भिक्ष-पोषितः । स्वामिना आहितो बन्धकीकृतः । मोक्षितः ऋणमोचनेनाङ्गीकृतदास्यः । तवाह-मित्युपगतः कस्याप्यदासः सन् स्वयं दासत्वेन दत्तरूपः । प्रव्रज्यावसितः सन्न्यासभ्रष्टः । कृतः केनचिन्निमित्तेन एतावत्कालपर्य्यन्तं तवाहं दास इति कृतसमयः । भक्तदासः सुभिक्षेऽपि भक्तार्थमङ्गीकृतदास्यः । वड़वाहृतः वड़वा दासी तल्लोभादङ्गीकृतदास्यः । इति श्रीकृष्णतर्का-लङ्कारकृतक्रमसंग्रहः ॥ तस्य कर्म्म यथा,—
"कर्म्मापि द्विविधं ज्ञेयमशुभं शुभमेव च ।
अशुभं दासकर्म्मोक्तं शुभं कर्म्मकृतां स्मृतम् ॥
गृहद्वाराशुचिस्थानरथ्यावस्करशोधनम् ।
गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम् ॥
अशुभं कर्म्म विज्ञेयं शुभमन्यदतः परम् ॥"
इति मिताक्षरायां नारदः ॥
"विप्रस्य किङ्करो भूपो वैश्यो भूपस्य भूमिप ! ।
सर्व्वेषां किङ्कराः शूद्रा ब्राह्मणस्य विशेषतः ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥

दासनन्दिनी, स्त्री, (दासस्य धीवरस्य नन्दिनी ।) सत्यवती । इति शब्दरत्नावली ॥

दासपूरं, क्ली, (दासान् धीवरान् पूरयतीति । पूर + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) कैवर्त्तीमुस्तकम् । इति शब्दरत्नावली ॥

दासिका, स्त्री, (दासति ददाति आत्मानमिति । दास दाने + ण्वुल् । टाप् अत इत्वञ्च ।) दासी । इत्यमरटीकायां भरतः ॥

दासी, स्त्री, (दासति ददात्यात्मानमिति । दास + अच् । गौरादित्वात् ङीष् ।) भुजिष्या । इति मेदिनी । से, ४ ॥ तत्पर्य्यायः । कर्म्मकरी २ । इति मुग्धबोधम् ॥ दासपर्य्यायशब्दाः स्त्रीलिङ्गे अस्याः पर्य्यायशब्दा भवन्ति ॥ (यथा, देवी-भागवते । १ । २० । ७२ ।
"न गता च वधूस्तत्र प्रेष्या संप्रेषिता तया ।
तस्याञ्च विदुरो जातो दास्यां धर्म्मांशतः शुभः ॥")
काकजङ्घा । नीलाम्लानः । नीलझिण्टी । इति राजनिर्घण्टः ॥ पीतझिण्टी । इति रत्नमाला ॥ वेदी । इति विश्वः ॥ (दास + ङीप् ।) शूद्र-पत्नी कैवर्त्तपत्नी च ॥ (नदीभेदः । यथा, महा-भारते । ६ । ९ । ३१ ।
"सुरसां तमसां दासीं सामान्यां वरणामसीम् ॥")

दासीघटः, पुं, (दासीपादनिक्षेप्यो घटः । मध्य-पदलोपिसमासः ।) नवम्यां महापातकिनः परित्यागार्थं सपिण्डसमानोदकनियुक्तदक्षिणा-भिमुखदासीपादनिःक्षेप्यजलपूर्णकलसः । तदनु-ष्ठानं यथा, मनुः । ११ । १८३—१८५ ।
"पतितस्योदकं कार्य्यं सपिण्डैर्बान्धवैर्बहिः ।
निन्दितेऽहनि सायाह्ने ज्ञात्यृत्विग्गुरुसन्निधौ ॥
दासीघटमपां पूर्णं पर्य्यस्येत् प्रेतवत् पदा ।
अहोरात्रमुपासीरन्नशौचं बान्धवैः सह ॥
निवर्त्तेरंश्च तस्मात्तु सम्भाषणसहासने ।
दायाद्यस्य प्रदानञ्च यात्रा चैव हि लौकिकी ॥"
"पतितस्येति । महापातकिनो जीवत एव प्रेत-स्योदकक्रिया वक्ष्यमाणरीत्या सपिण्डैः समानो-दकैश्च ग्रामाद्बहिर्गत्वा ज्ञात्यृत्विग्गुरुसन्निधाने रिक्तायां नवम्यां तिथौ दिनान्ते कार्य्या ॥ दासीति । सपिण्डसमानोदकनियुक्ता दासी उदकपूर्णं घटं प्रेतवदिति दक्षिणाभिमुखीभूय पादेन क्षिपेत् । यथा स निरुदको भवति अनु ते सपिण्डाः समानोदकैः सहाहोरात्रमशौच-माचरेयुः ॥ निवर्त्तेरन्निति । तस्मात् पति-तात् सपिण्डादीनां सम्भाषणमेकासनोपवेशनञ्च तस्मै ऋक्थप्रदानं सांवत्सरिकादौ निम-न्त्रणादिरूपो लोकव्यवहार एतानि निवर्त्ते-रन् ॥" इति कुल्लूकभट्टः ॥

दासीसभं, क्ली, (दासीनां सभा । "अशाला च ।" २ । ४ । २४ । इति क्लीवत्वम् ।) दास्याः सभा । इत्यमरः । ३ । ५ । २७ ॥

दासेयः, पुं, (दास + स्वार्थे ढक् ।) दासः । इत्य-मरः । २ । १० : १७ ॥ कैवर्त्तः । इति शब्द-रत्नावली ॥ (दासस्य अपत्यमिति ।) दासोत्-पन्ने, त्रि ॥

दासेयी, स्त्री, (दासेय + स्त्रियां ङीप् ।) सत्यवती । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । १०० । ४९ ।
"समीक्ष्य राजा दासेयीं कामयामास शान्तनुः ॥")

दासेरः, पुं, (दास्या अपत्यम् । ढ्रक् ।) दासः । इत्यमरः । २ । १० । १७ ॥ कैवर्त्तः । इति शब्द-रत्नावली ॥ (दास + बाहुलकात् एरच् ।) उष्ट्रः । दासिकापत्ये, त्रि । इति मेदिनी । रे, १६९ ॥

दासेरकः, पुं, (दासेर + स्वार्थे कन् ।) उष्ट्रः । इति राजनिर्घण्टः ॥ (यथा, माघे । ५ । ६६ ।
"दासेरकः सपदि संवलितं निषादै-
र्विप्रं पुरा पतगराड़िव निर्जगार ॥")
दासीसुतः । इति हारावली । २४८ ॥ (जाति-भेदः । यथा, महाभारते । ६ । ४७ । ३६ ।
"दशार्णकाः प्रयागाश्च दासेरकगणैः सह ॥")

दास्यं, क्ली, दासस्य भावः । (दास + ष्यञ् ।) दासत्वम् । यथा,—
"अर्च्चनं वन्दनं मन्त्रजपः सेवनमेव च ।
स्मरणं कीर्त्तनं शश्वद्गुणश्रवणमीप्सितम् ॥
निवेदनं स्वस्य दास्यं नवधा भक्तिलक्षणम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

दास्यमानः, त्रि, दाधातोः कर्म्मणि स्यमान-प्रत्ययेन निष्पन्नः । भविष्यद्दानसम्बन्धिवस्तु । इति व्याकरणम् ॥ "अपि च ऊनविंशतिदास्यमान पिण्डस्थानानि यथा ।" इति तिथ्यादितत्त्वम् ॥

दाहः, पुं, (दह + भावे घञ् ।) दहनम् । भस्मी करणम् । (यथा, मार्कण्डेये । ३० । २३ ।
"तदभावे च नृपतिः कारयेत् स्वकुटुम्बिना ।